श्रीलक्ष्मीनृसिंहपञ्चरत्नम्

{॥ श्रीलक्ष्मीनृसिंहपञ्चरत्नम् ॥}

त्वत्प्रभुजीवप्रियमिच्छसि चेन्नरहरिपूजां कुरु सततं

प्रतिबिम्बालंकृतिधृतिकुशलो बिम्बालंकृतिमातनुते ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां

भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥ १॥

शुक्तौ रजतप्रतिभा जाता कतकाद्यर्थसमर्था चे-

द्दुःखमयी ते संसृतिरेषा निर्वृतिदाने निपुणा स्यात् ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां

भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥ २॥

आकृतिसाम्याच्छाल्मलिकुसुमे स्थलनलिनत्वभ्रममकरोः

गन्धरसाविह किमु विद्येते विफलं भ्राम्यसि भृशविरसेस्मिन् ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां

भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥ ३॥

स्रक्चन्दनवनितादीन्विषयान्सुखदान्मत्वा तत्र विहरसे

गन्धफलीसदृशा ननु तेमी भोगानन्तरदुःखकृतः स्युः ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां

भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥ ४॥

Stotram Digitalized By Sanskritdocuments.org

तव हितमेकं वचनं वक्ष्ये शृणु सुखकामो यदि सततं

स्वप्ने दृष्टं सकलं हि मृषा जाग्रति च स्मर तद्वदिति।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां

भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥ ५॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य

श्री गोविन्द भगवत्पूज्यपाद शिष्यस्य

श्रीमच्छंकर भगवतः कृतौ

लक्ष्मीनृसिंह पञ्चरत्नम् सम्पूर्णम् ॥

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Lakshmi Narasimha Pancharatnam Lyrics in Devanagari PDF
% File name : laxm-nri.itx
% Category : pancharatna
% Location : doc_vishhnu
% Author : Shankaracharya
% Language : Sanskrit
% Subject : hinduism/religion
% Latest update : December 1, 1999
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of

% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website